**SET-4**

**Series ΩQAΩA**

प्रश्न-पत्र कोड
Q.P. Code **52**

रोल नं.
Roll No.

परीक्षार्थी प्रश्न-पत्र कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।
Candidates must write the Q.P. Code on the title page of the answer-book.

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **8** हैं ।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए प्रश्न-पत्र कोड को परीक्षार्थी उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें ।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में **9** प्रश्न हैं ।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, उत्तर-पुस्तिका में प्रश्न का क्रमांक अवश्य लिखें ।**
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे ।
- Please check that this question paper contains **8** printed pages.
- Q.P. Code given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **9** questions.
- **Please write down the serial number of the question in the answer-book before attempting it.**
- 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period.

# संस्कृतम्

# SANSKRIT

*अवधि : होराद्वयम्*
*निर्धारित समय : 2 घण्टे*
*Time allowed : 2 hours*

*पूर्णाङ्काः : 40*
*अधिकतम अंक : 40*
*Maximum Marks : 40*

***General Instructions :***

*Read the following instructions carefully and follow :*

1. *This question paper contains three sections – Unseen Passage, Writing Skill and Text-books.*
2. *Section A (Unseen Passage) contains four parts and attempt all parts with choice as given there, based on specific instructions given in the question itself.*
3. *Section B (Writing Skill) contains three questions. Attempt all three questions based on specific instructions given in the question itself.*
4. *Section C (Text Books Based Question) contains five main questions with choice as given there, as per the instructions given in the question itself.*

## खण्डः क

## वर्णनात्मकाः प्रश्नाः

## अपठित-अवबोधनम्

**1.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत : *10*

"चलभाषियन्त्रम्" वर्तमानयुगस्य जीवनम् एव वर्तते । अस्य मुख्यं प्रयोजनं दूरस्थेन जनेन सह वार्तालापः इति, परम् अद्य अस्माकं जीवनशैली एव अनेन पूर्णतया प्रभाविता वर्तते । अधुना अनेन केवलं वार्ता एव न भवति अपितु वार्तया सहैव वयं प्रियजनं द्रष्टुम् अपि सक्षमाः । अपि च ईमेल-फेसबुक-व्हाटसएप-माध्यमैः वार्ता सुकरा भवति । अस्य माध्यमेन गमनागमनार्थं शीघ्रमेव जनाः सरलतया वाहनं प्राप्नुवन्ति । यदि कदापि वयं मार्गं विस्मरामः तदा उचितं मार्गं प्रदर्शयितुम् अपि इदम् श्रेयस्करम् । न केवलमेतदेव अपितु एतत् यन्त्रं विभिन्नाभिः क्रीडाभिः मनोरञ्जनं चापि करोति, अतः बालाः, वृद्धाः, युवकाः सर्वे एव एतस्य यन्त्रस्य दासाः अभवन् । अधुना तु इदं यन्त्रं मित्रं, विद्यालयः, मार्गदर्शकः च सर्वमपि अभवत् ।

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्) *2×1=2*

(i) वर्तमानयुगस्य जीवनम् किं वर्तते ?

(ii) के सरलतया वाहनं प्राप्नुवन्ति ?

(iii) एतत् यन्त्रं काभिः मनोरञ्जनं चापि करोति ?

(ब) पूर्णवाक्येन लिखत । (केवलं प्रश्नद्वयम्) *2×2=4*

(i) अद्य चलभाषियन्त्रेण का प्रभाविता वर्तते ?

(ii) अधुना वार्ता कैः सुकरा भवति ?

(iii) के एतस्य यन्त्रस्य दासाः अभवन् ?

(स) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत । *1*

(द) यथानिर्देशम् उत्तरत । (केवलं प्रश्नत्रयम्) *3×1=3*

(i) 'करोति' इत्यस्याः क्रियायाः कर्तृपदं किम् ?

(ii) 'सुकरा' इति पदस्य विशेष्यं गद्यांशात् चित्वा लिखत ।

(iii) 'हितकरम्' इत्यस्य पदस्य कः पर्यायः अत्र आगतः ?

(iv) अनुच्छेदे 'कठिनतया' पदस्य कः विपर्ययः आगतः ?

## खण्डः ख

## रचनात्मकं कार्यम्

**2.** भवान् देवांश: । रामायणं पठनाय मित्रम् अक्षतं प्रोत्साहितं कर्तुं लिखिते पत्रे रिक्तस्थानानि पूरयित्वा पत्रं च पुन: उत्तरपुस्तिकायां लिखतु । $10\times\frac{1}{2}=5$

76, हरिमार्गम्

(i) ______________

दिनाङ्क: ____________

प्रिय मित्र (ii) ___________ !

नमोनम: ।

अत्र (iii) ____________ तत्रास्तु । गतसप्ताहे मम (iv) ___________ आसीत् । तस्मिन् अवसरे मम पिता मह्यम् 'रामायणम्' इति (v) ___________ उपहाररूपेण दत्तवान् । अद्यत्वे अहं तत् पुस्तकं (vi) ___________ पठामि । अत: अधुना त्वां प्रति पुस्तकविषये लेखितुम् इच्छामि । रामायणं पुस्तकं वस्तुत: (vii) ___________ शिक्षयति । एतस्य पठनेन अस्माकं मनसि भ्रातृभावस्य, मित्रताया:, पितरं प्रति च (viii) ___________ अपि विकास: भविष्यति । अस्मिन् आधुनिके युगे तु अस्य ज्ञानस्य अत्यावश्यकता वर्तते । मम निवेदनम् अस्ति यद् भवान् अपि अस्य पुस्तकस्य (ix) ___________ करोतु अन्यान् च अपि प्रोत्साहितं करोतु । पितृभ्यां मम प्रणामा: ।

तव (x) ______________

देवांश:

**मञ्जूषा**

| |
|---|
| पुस्तकम्, कुशलम्, अक्षत, सुन्दरनगरात्, जन्मदिवस:, मित्रम्, मनोयोगेन, जीवनपद्धतिं, भक्तिभावनाया:, अध्ययनम् । |

**3.** अध: प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया **पञ्च** वाक्यानि संस्कृतेन लिखत : *5×1=5*



**मञ्जूषा**

| |
|---|
| नगरस्य, स्तः, भवनानि, बालौ, उड्डयन्ति, पादपान्, पर्यावरणम्, प्रसन्नौ, पक्षिणः, जलपात्रम्, शुद्धम्, भवेयुः, जागरूकाः, सर्वत्र । |

**अथवा**

मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य **पञ्चभिः** संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत । *5×1=5*

**'पर्यावरणम्'**

**मञ्जूषा**

| |
|---|
| वृक्षाः, वातावरणम्, सन्ति, आक्सीजनं, जीवनवायुः, आरोपयेत्, हरीतिमा, सर्वत्र, जागरूकाः, संरक्षणम्, वनमहोत्सवः, मान्यते । |

**4.** अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत : (केवलं वाक्य**पञ्च**कम्) *5×1=5*

(i) लिपिक अपना कार्य करता है ।
Clerk does his work.

(ii) दो किसानों ने खेत जोता था ।
Two farmers ploughed the field.

(iii) मैं आलस्य का त्याग करूँगा ।
I will leave laziness.

(iv) तुम सब मिलकर गीत बोलो ।
You recite song together.

(v) हमें रोज व्यायाम करना चाहिए ।
We should exercise daily.

(vi) सफलता परिश्रम का परिणाम है ।
Success is the result of hard work.

(vii) कल मोहन कहाँ था ?
Where was Mohan yesterday ?

## खण्डः ग

## पठितावबोधनम्

**5.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत : *3*

स भारवेदनया क्रन्दति स्म । तस्य क्रन्दनं निशम्य मुदित आरक्षी तमुवाच — 'रे दुष्ट ! तस्मिन् दिने त्वयाऽहं चोरिताया मञ्जूषाया ग्रहणाद् वारितः । इदानीं निजकृत्यस्य फलं भुङ्क्ष्व । अस्मिन् चौर्याभियोगे त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे' इति प्रोच्य उच्चैः अहसत् ।
यथाकथञ्चिद् उभौ शवमानीय चत्वरे स्थापितवन्तौ ।

न्यायाधीशेन पुनस्तौ घटनायाः विषये वक्तुमादिष्टौ । आरक्षिणि निजपक्षं प्रस्तुतवति आश्चर्यमघटत, स शवः प्रवारकमपसार्य न्यायाधीशमभिवाद्य निवेदितवान् — मान्यवर ! एतेन आरक्षिणा अध्वनि यदुक्तं तद् वर्णयामि, 'त्वयाऽहं चोरिताया मञ्जूषाया ग्रहणाद् वारितः, अतः निजकृत्यस्य फलं भुङ्क्ष्व । अस्मिन् चौर्याभियोगे त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे' इति ।

(अ) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्) $2\times\frac{1}{2}=1$

(i) अभियुक्त: कया क्रन्दति स्म ?

(ii) क: उच्चै: अहसत् ?

(iii) उभौ शवमानीय कुत्र स्थापितवन्तौ ?

(ब) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्) $2\times1=2$

(i) क्रन्दनं निशम्य मुदित: आरक्षी किम् उवाच ?

(ii) केन पुनस्तौ घटनाया: विषये वक्तुमादिष्टौ ?

(iii) यदा आरक्षिणि निजपक्षं प्रस्तुतवति तदा किम् आश्चर्यमघटत ?

**6.** अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत : 3

निमित्तमुद्दिश्य हि य: प्रकुप्यति,
ध्रुवं स तस्यापगमे प्रसीदति ।
अकारणद्वेषि मनस्तु यस्य वै,
कथं जनस्तं परितोषयिष्यति ।।

(अ) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्) $2\times\frac{1}{2}=1$

(i) नर: किम् उद्दिश्य प्रकुप्यति ?

(ii) कोपस्य निमित्ते समाप्ते सति किं स जन: प्रसीदति ?

(iii) कीदृशं मन: न प्रसीदति ?

(ब) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्) $2\times1=2$

(i) य: निमित्तमुद्दिश्य प्रकुप्यति स: कदा प्रसीदति ?

(ii) जना: कीदृशं जनं परितोषयितुं न शक्नुवन्ति ?

(iii) अत्र कस्य अपगमस्य वर्णनम् अस्ति ?

**7.** अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत : *3*

वनस्य दृश्यम् । समीपे एवैका नदी अपि वहति । एक: सिंह: विश्राम्यते तदैव एक: वानर: आगत्य तस्य पुच्छं धुनोति । क्रुद्ध: सिंह: तं प्रहर्तुमिच्छति परं वानरस्तु कूर्दित्वा वृक्षमारूढ: । तदैव अन्यस्मात् वृक्षात् अपर: वानर: सिंहस्य कर्णमाकृष्य पुन: वृक्षोपरि आरोहति । एवमेव वानरा: वारं वारं सिहं तुदन्ति । क्रुद्ध: सिंह: इतस्तत: धावति, गर्जति परं किमपि कर्तुमसमर्थ: एव तिष्ठति । वानरा: हसन्ति वृक्षोपरि च विविधा: पक्षिण: अपि सिंहस्य एतादृशीं दशां दृष्ट्वा हर्षमिश्रितं कलरवं कुर्वन्ति । निद्राभङ्गदु:खेन वनराज: सन्नपि तुच्छजीवै: आत्मन: एतादृश्या दुरवस्थया श्रान्त: सर्वजन्तून् दृष्ट्वा पृच्छति ।

(अ) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्) $2\times\frac{1}{2}=1$

(i) कस्य दृश्यम् अस्ति ?

(ii) के सिहं तुदन्ति ?

(iii) वनस्य समीपे का वहति ?

(ब) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्) $2\times1=2$

(i) यदा सिंह: विश्राम्यते तदा किम् अभवत् ?

(ii) विविधा: पक्षिण: किं दृष्ट्वा हर्षमिश्रितं कलरवं कुर्वन्ति ?

(iii) वनराज: किमर्थं क्रुद्ध: अभवत् ?

**8.** मञ्जूषात: समुचितपदानि चित्वा अधोलिखितश्लोकस्य अन्वयं पूरयत : $4\times\frac{1}{2}=2$

य इच्छत्यात्मन: श्रेय: प्रभूतानि सुखानि च ।
न कुर्यादहितं कर्म स परेभ्य: कदापि च ।।

**अन्वय: –**

य: (i) __________ श्रेय: प्रभूतानि (ii) __________ च इच्छति, स: (iii) __________ अहितं कर्म (iv) __________ च न कुर्यात् ।

**मञ्जूषा**

| कदापि, आत्मनः, सुखानि, परेभ्य: । |
|---|

**अथवा**

मञ्जूषायाः साहाय्येन प्रदत्तश्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत : $4\times\frac{1}{2}=2$

आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः ।
नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति ।।

**भावार्थः –**

अस्य भावोऽस्ति यत् (i) _________ शरीरे स्थितम् (ii) __________ एव तेषां महान् शत्रुः अस्ति । एवमेव पुरुषार्थः इव तेषां कोऽपि अन्यः (iii) ___________ नास्ति । तं (पुरुषार्थं) कृत्वा (iv) __________ कदापि न दुःखितो भवति ।

**मञ्जूषा**

| मानवः, मानवानाम्, बन्धुः, आलस्यम् । |
|---|

**9.** अधोलिखित-कथांशं समुचित-क्रमेण लिखत : $8\times\frac{1}{2}=4$

(i) वानराः तं तुदन्ति स्म ।

(ii) सर्वे प्राणिनः इदं दृष्ट्वा सिंहं राज्ञः पदाय अयोग्यं मन्यन्ते ।

(iii) एकः सिंहः सुप्यति स्म ।

(iv) सर्वेषां प्राणिनां यथासमयं महत्त्वं विद्यते ।

(v) यूयं मिलित्वा एव मोदध्वं जीवनं च रसमयं कुरुध्वम् ।

(vi) कोऽपि पशुः राजा न भविष्यति अपितु पक्षी एव राजेति इति निश्चितम् अभवत् ।

(vii) सर्वे प्राणिनः परस्परं विवादं कुर्वन्ति आत्मानं योग्यं च कथयन्ति ।

(viii) ततः प्रकृतिमाता प्रविशति ।